"खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने ।
प्राजापत्यं चरेत् कृच्छ्रमब्दमेकं समाहितः ॥")

खट्वारूढः, त्रि, (खट्वामारूढः । "खट्वा क्षेपे ।" २।१।२६ । इति निन्दायां द्वितीयान्तस्य क्तान्तेन नित्यसमासः ।) अविनीतः । प्रमादवान् । इति त्रिकाण्डशेषभूरिप्रयोगौ ॥ (यथा, भट्टौ ।५।१०।
"हृतस्त्वं पात्रसमितेः खट्वारूढः प्रमादवान् ।
पानशौण्डः श्रियं नेता नात्यन्तीनत्वसुन्मनाः ॥"
"खट्वारूढः उत्पथस्थितः । खट्वा क्षेपे इति द्वितीया ।" इति जयमङ्गलटीका ॥) खट्वारूढो नरो जाल्मः । इति कलापव्याकरणम् ॥ (वेदं व्रतानि च समाप्य समावर्त्तेन हि खट्वा रोढ़व्या ब्रह्मचर्यं एव भूमिशयनार्होऽपि यः खट्वामारोहति स जाल्मः । रूढ़श्चायं तेन खट्वामारोहतु मा वा निषिद्धानुष्ठानपरः सर्व्वोऽपि खट्वारूढ़ उच्यते । इति शब्दार्थचिन्तामणिः ॥) खट्वोपरिस्थितश्च ॥

खट्विका, स्त्री, (अल्पा खट्वा । अल्पार्थे कन् । अत इत्वञ्च ।) क्षुद्रखट्वा । इति जटाधरः ॥ खट्वाविशेषः । तद्युक्तिर्यथा,—
"ब्रह्मक्षत्रियवैश्यानां चतुःषड़ष्टकोणिकाः ।
खट्विकाः सुखसम्भूताः शुक्लरक्तासिताम्बराः ॥"
इति युक्तिकल्पतरौ खट्विकोद्देशः ॥

खड, इ ड मथि । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् । इदित् ।) मथि मन्थने मन्थनश्चेह भञ्जनम् । इ, खण्ड्यते । ड, खण्डते दण्डेन भाण्डं लोकः । इति दुर्गादासः ॥

खड, क भेदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, खाड़यति । इति दुर्गादासः ॥

खड़ं, क्ली, पुं, (खण्ड्यते छिद्यते धान्ये पक्के सति इति । खड़ + कर्म्मणि अप् ।) तृणम् । इति शब्दरत्नावली । खड़ इति भाषा ॥

खड़ः, पुं, (खड़ + भावकर्म्मादौ यथायथं अप् ।) पानान्तरम् । भेदः । इति मेदिनी । ड़ । ८ ॥ खड़यूषो यथा, चक्रदत्ते ।
"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः ।
सुपक्वः खड़यूषोऽयमयं काम्बलिकोऽपरः ॥"

खड़क्किका, स्त्री, (खड़क् इत्यव्यक्तशब्दं करोतीति । कृ + बाहुलकात् डः ततो गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) पक्षद्वारम् । इति हारावली ॥ खड़किद्वार इति भाषा ॥

खड़तूः, पुं, (खड़ + अतूप्रत्ययः ।) बाहुजङ्घाभरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

खड़िका, स्त्री, (खड़् + अप् + गौरादित्वात् ङीष् । ततः स्वार्थे कन् पूर्व्वह्रस्वः ।) कठिनी । इति जटाधरः ॥

खड़ी, स्त्री, (खड़् + अप् + ततो ङीष् ।) कठिनी । स्वनामख्यातश्वेतवर्णमृत्तिकाविशेषः । इति शब्दचन्द्रिका ॥ अस्या गुणपर्य्यायौ कठिनीशब्दे खटीशब्दे च द्रष्टव्यौ ॥

खडूः, स्त्री, (खड़् + "खडेर्हुड्वा ।" उणां ।१।८४। इति ऊः ।) मृतशय्या । (बाहुजङ्घाभरणम् । इत्युज्ज्वलदत्तः ॥)

खड्गं, क्ली, (खड़ भेदे + "छापूखड़िभ्यः कित् ।" उणां । १ । १२३ । इति गन् प्रत्ययः ।) लोहम् । इति राजनिर्घण्टः ॥

खड्गः, पुं, (खड़ति भिनत्तीति । खड़् + "छापूखड़िभ्यः कित् ।" उणां ।१।१२३ । इति गन् ।) गण्डकः । गण्डार इति भाषा ॥ (यथा, मनुः । ३ । २७२ ।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु ।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः ॥"
"खड्गो गण्डकः लोहो लोहितवर्णश्छाग एव ।" इति कुल्लूकभट्टः ॥) गण्डकशृङ्गम् । खाग इति भाषा । बुद्धभेदः । इति मेदिनी ॥ चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ अस्त्रविशेषः । खाँड़ा तरवाल इत्यादि भाषा ॥ (यथा, महाभारते । ४ । ४१ । २५ ।
"यस्त्वयं विपुलः खड्गो गव्ये कोषे समर्पितः ।
सहदेवस्य विद्धेनं सर्व्वभारसहं दृढ़म् ॥")
तत्पर्य्यायः । निस्त्रिंशः २ चन्द्रहासः ३ असिः ४ रिष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करवालः ८ कृपाणः ९ । इत्यमरः ।२।८।८९ ॥ ऋष्टिः १० करपालः ११ । इति तट्टीका ॥ विशसनः १२ तीक्ष्णधारः १३ दुरासदः १४ श्रीगर्भः १५ विजयः १६ धर्म्मपालः १७ कौक्षेयः १८ तरवारिः १९ तवराजः २० कृपाणकः २१ कृपाणी २२ शस्त्रः २३ । इति शब्दरत्नावली ॥ * ॥ तस्योत्पत्तिर्ब्रह्मणो यज्ञाग्नौ यथा,—
"विकीर्य्याग्निं तथाभूतमुत्थितं श्रूयते तदा ।
नीलोत्पलसवर्णाभं तीक्ष्णदंष्ट्रं कृशोदरम् ॥
प्रांशुं सुदुर्द्धर्षतरं तथैव ह्यमितौजसम् ।
ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः ॥
विमलस्तीक्ष्णधारश्च कालान्तक इवोद्यतः ।
ततः स शितिकण्ठाय रुद्रायर्षभकेतवे ॥
ब्रह्मा ददावसिं तीक्ष्णमधर्म्मप्रतिवारणम् ।
ततः स भगवान् रुद्रो दानवक्षतजोक्षितम् ॥
असिं धर्म्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे ।
विष्णुर्मरीचये स महर्षिभ्यः ते इन्द्राय स लोकपालेभ्यः ते मनवे सूर्य्यपुत्राय स क्षुपाय स इक्ष्वाकवे स पुरूरवसे स आयवे स नहुषाय स ययातये स पूरवे स अमूर्त्तरयसे स भूमिशयाय स भरताय स ऐड़विड़ाय स धुन्धुमाराय स काम्बोजाय स मुचुकुन्दाय स मरुत्ताय स रैवताय स यौवनाश्वाय स रघवे स हरिणाश्वाय स शुनकाय स उशीनराय स भोजाय स शिवये स प्रतर्द्दनाय स अष्टकाय स ऋषदश्वाय स भरद्वाजाय स द्रोणाय स कृपाय स पाण्डवेभ्यो दत्तवान् ॥ * ॥ अथ खड्गविषयकत्रयोदशविधस्वरूपं यथा, महाभारते ।
"मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते ।
तदेव बाहुमुद्यम्य कृतमुद्भ्रान्तमीरितम् ॥
भ्रामणं स्वस्य परितः खड्गस्याविद्धमुच्यते ।
परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम् ॥
शत्रोराक्रमणार्थाय गमनमाप्लुतं मतम् ।
खड्गस्याग्रेण तद्देहस्पर्शनं प्रसृतं मतम् ॥
वञ्चयित्वा रिपौ शस्त्रपातनं गदितं सृतम् ।
परिवृत्तं भवेत् शत्रोर्वामदक्षिणतो गतिः ॥
पश्चात् पदापसरणं निवृत्तं संप्रचक्षते ।
अन्योऽन्यताड़नं प्राहुः सम्पातमुभयोरपि ॥
आधिक्यमात्मनो यत् तत् समुदीर्णमुदीरितम् ।
अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम् ॥
विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम् ।
निलीय चर्म्मणि क्षेपो यदरेः सात्वतं हि तत् ॥"
तस्य परीक्षा तरवारिशब्दे द्रष्टव्या ॥ (अस्य लक्षणादिकं यथा, वृहत्संहितायां ५० अध्याये ।
"अङ्गुलशतार्धमुत्तम ऊनः स्यात्पञ्चविंशतिं खड्गः ।
अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः ॥
श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम् ।
सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानाञ्च ॥
कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः ।
खड्गे व्रणा न शुभदा वंशानुगाः प्रभूताश्च ॥
स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृक्मनोऽनुगतः ।
अस्वन इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः ॥
क्वणितं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात् ।
स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे ॥
नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम् ।
देशं न चास्य कथयेत् प्रतिमानयेच्च
नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥
गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च ।
करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः ॥
निष्पन्नो न च्छेद्यो निकषैः कार्य्यः प्रमाणयुक्तः सः ।
मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ॥
यस्मिन् त्सरुप्रदेशे व्रणो भवेत्तद्वदेव खड्गस्य ।
वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्टा ॥
अथवा स्पृशति यदङ्गं पृष्टा निस्त्रिंशभृत्तदवधार्य्य ।
कोशस्थस्यादेश्यो व्रणोऽसि शास्त्रं विदित्वेदम् ॥
शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे ।
भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे ॥
नासोष्ठकपोलहनुश्रवणग्रीवांसकेषु पञ्चाद्याः ।
उरसि द्वादशसंस्थस्त्रयोदशे कक्षयोर्ज्ञेयः ॥
स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशादयो ज्ञेयाः ।
नाभीमूले कट्यां गुह्ये चैकोनविंशतितः ॥
ऊर्वोर्द्वाविंशे स्यात् ऊर्वोर्मध्ये त्रयस्त्रयोविंशे ।
जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च ॥
जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च ।
षड्विंशतिकाद्यावत्त्रिंशदिति मतेन गर्गस्य ॥
पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च बन्धश्च ।
एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत् क्रमशः ॥
सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधनलाभौ ।
क्रमशो विनाशवनिताप्तिचित्तदुःखानि षट्प्रभृति ॥
लब्धिर्हानिः स्त्रीलब्धयो वधो वृद्धिमरणपरितोषाः ।
ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात् ॥